**कौलिशिक** त्रि० कुलिश+अङ्गुल्या० इवार्थे ठक्। कुलिशसदृशे

**कौलीन** त्रि० कौ पृथिव्यां लीनः ७त० अलुक् स०। १भूमिलग्ने। कुलादागतः खञ्। २कुलक्रमागते "इदन्त्व दुवनर्थ्यां कौलीनं नाद्यवर्त्तत" रामा० आ० ८७अ०। ली-भावे क्त कौ लीनं लयो यस्मात्, कुलीनं भूमिलग्नमर्हति अण् वा। भूमिलग्नतासाधने ३अपवादे "कौलीनमात्माश्रयमाचचक्षे" "कौलीनभीतेन गृहान्निरस्ता" रघुः "मा कौलीनादसितनयने! मय्यविश्वासिनी भूः" मेघः अपवादे हि भूमिलग्नस्य लोकोऽभवतीति तस्य तथात्वम्। ४गुह्ये ५जन्ये (युद्धे) ६कुकार्ये ७पशुसर्पाणां युद्धे च न० मेदि० तेषां भूमिलग्नतासाधनत्वात्तथात्वम्।

**कौलीरा** स्त्री कुलीरः तच्छृङ्गाकारोऽस्त्यस्याः अच्। कर्कटशृङ्ग्याम् (काँकडाशिङ्गा) राजनि०

**कौलेय** त्रि० कुले+भवः बा० ढक्। सत्कुलोत्पन्ने भरतः

**कौलेयक** पु० कुले भवः श्वा ढकञ्। १कुलागते कुक्कुरे। अमरः २सत्कुलीने मेदि०।

**कौलेशभैरवी** स्त्री त्रिपुराभैरवीभेदे। "सम्पत्प्रदाभैरवीवत् विद्धि कौलेशभैरवीम्। हसाद्याः सैव देवेशि! त्रिषु बीजेषु पार्वति!" ज्ञानार्णवः। "त्रिकूटे हसाद्यासेत् तदा कौलेशभैरवी भवति" तन्त्रसारः

**कौल्माषिक** त्रि० कुल्माषे साधु ठञ्। कुल्माषप्रसाधने

**कौल्माषीण** न० कुल्माषाणां भवनं क्षेत्रम् खञ्। कुल्माषधान्योत्पत्तियोग्ये क्षेत्रे

**कौल्य** त्रि० कुले भवः ष्यञ्। सत्कुलीने द्विरूपकोषः।

**कौवल** न० कुवलमेव प्रज्ञा० स्वार्थे अण्। कोलिफले द्विरूपको०।

**कौविदार्य्य** त्रि० कोविदार+चतुरर्थ्याम् प्रगद्या० ञ्य। कोविदारसन्निकृष्टदेशादौ।

**कौवेर** त्रि० कुवेरस्येदम्, कुवेरो देवताऽस्य वा अण्। १कुवेरसंबन्धिनि २तद्देवताके च "कौवेरमथ याम्यञ्च चक्राते वरुणस्य च" देवीमा०। "यानं सस्मार कौवेरम्" रघुः। "कौवेरदिग्भागमपास्य मार्गम्" माघः। स्त्रियां ङीप्। "दिग्विभागे तु कौवेरी दिक् शिवाप्रीतिदायिनी" ति०त० पु०। "ततः प्रतस्थे कौवेरीम्" रघुः। ३कुष्ठद्रव्ये (कुड़) न० शब्दरत्ना०। [रिकाया अपत्ये।

**कौवेरिकेय** पुंस्त्री० कुवेरिकाया अपत्यम् शुभ्रा० ढक्। कुवे-

**कौश** न० कुशाः भूम्ना सन्त्यत्र अण्। १कान्यकुब्जदेशे हेमच०। स्वार्थेऽण्। २कुशद्वीपे "शाकं ततः शाल्मलमत्र कौशम्" सि० शि०। कुशशब्दे २१४५पृ० विवृतिः। कुशस्येदं तद्विकारो वा अण्। ३कुशसम्बन्धिनि ४तन्मये पवित्रादौ। "तत्र वासाय शयने कौशे सुखमुवास ह" भा० अनु० १९अ०। स्त्रियां ङीप्। "कौश्यां बृस्यां समासीनम्" भा० अनु० ५४अ०

**कौशल** न० कुशलस्य भावः युवा० अण्। दक्षतायाम् "सीमेव पद्मासनकौशलस्य" भट्टिः। "आन्वीक्षिकी कौशलानाम्" "योगः कर्म्मसु कौशलम्" गीता। "व्यवहारे छविर्वचनानां कौशलं दृशि विकारविशेषः" माघः।

**कौशलि** पुंस्त्री० कुशलाया अपत्यं बाह्वा० इञ्। कुशलाया अपत्ये स्त्रियां वा ङीप्। यून्यपत्ये फञ्। कौशलायन तदीययुवापत्ये पुंस्त्री

**कौशलिका** स्त्री कुशलस्य पृच्छा ठक्। १कुशलप्रश्ने। कुशलाय मङ्गलाय दीयते ठक्। २उपायने उपढौकने। त्रिका०। [ढौकने २कुशलप्रश्ने च त्रिका०।

**कौशली** स्त्री कुशलाय दीयते तस्य पृच्छा वा अण्। १उप-

**कौश(स)लेय** स्त्री कौश(स)ल्याया अपत्यं ढक् यलोपः। श्रीरामे दशरथपुत्रे

**कौशल्य** न० कुशलमेव ब्राह्म० ष्यञ्। १कुशले। भावे ब्राह्म० ष्यञ्। २दक्षतायाम्। "दृष्ट्वा कौशल्यमन्योन्यं रथचर्य्यावतस्थिरे" भा० व० २४४अ०

**कौश(स)ल्या** स्त्री कोश(स)लदेशे भवा ञ्य। कोश(स)लदेशभवायां श्रीराममातरि दशरथपत्नीभेदे। [दयोऽप्यत्र।

**कौश(स)ल्यातनय** पु० ६त०। सीतापतौ श्रीरामे तत्सुता-

**कौश(स)ल्यायनि** पु० कौश(स)ल्याया अपत्यम् फिञ्। श्रीरामे त्रिका० "अयामहे न गच्छामः कौश(स)ल्यायनिवल्लभाम्" भट्टिः। कोश(स)लस्य पर्यायार्थकता जयमङ्गलयोक्ता।

**कौशाम्ब** त्रि० कुशाम्बेन निर्वृत्तः अण्। १कौशाम्बराजकृते २तत्कृते पुरीभेदे स्त्री ङीप्। "कुशाम्बस्तु महातेजाः कौशाम्बीमकरोत् पुरीम्" रामा०। सा च पुरी गौडदेशान्तर्गतवत्सभूमिगता। "अस्ति वत्स इति ख्यातो देश इत्युपक्रमे" कौशाम्बी नाम तत्रास्ति मध्यभागे महापुरी" कथासरित्सागरः। "अस्ति गौडविषये कौशाम्बी नाम नगरी" हितो०। "निष्कौशाम्बिः" सि० कौ०

**कौशाम्बेय** पुंस्त्री कुशाम्बस्य गोत्रापत्यम् शुभ्रा० ढक्। कुशाम्बवंश्ये

**कौशिक** न० कुशिकस्यापत्यं ऋष्यण् कुशेन कृतः अध्या० ठञ्। कुशिके तद्वंशे भवः अण् वा। १इन्द्रे २पेचके पुंस्त्री० उभयत्र "अशनुवन् सोढुमधीरलोचनः सहस्ररश्मेरिव